# Shri Surya Sahasranamavali 1 108 Names

# શ્રીસૂર્યસહસ્રનામાવલી ૧

## Document Information

Text title : Shri Surya Sahasranamavali 1 1008 Names

File name : suuryasahasranAmAvalIBhaviShya.itx

Category : sahasranAmAvalI, navagraha, stotra

Location : doc_z_misc_navagraha

Author : Traditional

Transliterated by : From stotra

Proofread by : PSA Easwaran

Description-comments : From bhaviShyapuraNa referenced in Gita press version. Shaktapramoda has variations. Se corresponding stotra.

Latest update : January 18, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 7, 2020

*sanskritdocuments.org*

# શ્રીસૂર્યસહસ્રનામાવલી ૧

ધ્યાનમ્ -
ધ્યેયઃ સદા સવિતૃમણ્ડલમધ્યવર્તી
    નારાયણઃ સરસિજાસનસન્નિવિષ્ટઃ ।
કેયૂરવાન્ મકરકુણ્ડલવાન્ કિરીટી
    હારી હિરણ્મયવપુર્ધૃતશઙ્ખચક્રઃ ॥

ૐ વિશ્વવિદે નમઃ । વિશ્વજિતે । વિશ્વકર્ત્રે । વિશ્વાત્મને । વિશ્વતોમુખાય ।
વિશ્વેશ્વરાય । વિશ્વયોનયે । નિયતાત્મને । જિતેન્દ્રિયાય । કાલાશ્રયાય ।
કાલકર્ત્રે । કાલઘ્ને । કાલનાશનાય । મહાયોગિને । મહાસિદ્ધયે ।
મહાત્મને । સુમહાબલાય । પ્રભવે । વિભવે । ભૂતનાથાય નમઃ । ૨૦

ૐ ભૂતાત્મને નમઃ । ભુવનેશ્વરાય । ભૂતભવ્યાય । ભાવિતાત્મને ।
ભૂતાન્તઃકરણાય । શિવાય । શરણ્યાય । કમલાનન્દાય । નન્દનાય ।
નન્દવર્ધનાય । વરેણ્યાય । વરદાય । યોગિને । સુસંયુક્તાય ।
પ્રકાશકાય । પ્રાપ્તયાનાય । પરપ્રાણાય । પૂતાત્મને । પ્રયતાય ।
પ્રિયાય નમઃ । ૪૦

ૐ નયાય નમઃ । સહસ્રપાદે । સાધવે । દિવ્યકુણ્ડલમણ્ડિતાય ।
અવ્યઙ્ગધારિણે । ધીરાત્મને । સવિત્રે । વાયુવાહનાય । સમાહિતમતયે ।
દાત્રે । વિધાત્રે । કૃતમઙ્ગલાય । કપર્દિને । કલ્પપાદે । રુદ્રાય ।
સુમનાય । ધર્મવત્સલાય । સમાયુક્તાય । વિમુક્તાત્મને ।
કૃતાત્મને નમઃ । ૬૦

ૐ કૃતિનાં વરાય નમઃ । અવિચિન્ત્યવપવે । શ્રેષ્ઠાય । મહાયોગિને ।
મહેશ્વરાય । કાન્તાય । કામારયે । આદિત્યાય । નિયતાત્મને । નિરાકુલાય ।
કામાય । કારુણિકાય । કર્ત્રે । કમલાકરબોધનાય । સપ્તસપ્તયે ।
અચિન્ત્યાત્મને । મહાકારુણિકોત્તમાય । સઞ્જીવનાય । જીવનાથાય ।
જયાય નમઃ । ૮૦

ૐ જીવાય નમઃ । જગત્પતયે । અયુક્તાય । વિશ્વનિલયાય । સંવિભાગિને ।
વૃષધ્વજાય । વૃષાકપયે । કલ્પકર્ત્રે । કલ્પાન્તકરણાય । રવયે ।
એકચક્રરથાય । મૌનિને । સુરથાય । રથિનાં વરાય । સક્રોધનાય ।
રશ્મિમાલિને । તેજોરાશયે । વિભાવસવે । દિવ્યકૃતે । દિનકૃતે નમઃ । ૧૦૦

ૐ દેવાય નમઃ । દેવદેવાય । દિવસ્પતયે । દીનનાથાય । હરાય ।
હોત્રે । દિવ્યબાહવે । દિવાકરાય । યજ્ઞાય । યજ્ઞપતયે । પૂષ્ણે ।
સ્વર્ણરેતસે । પરાવરાય । પરાપરજ્ઞાય । તરણયે । અંશુમાલિને ।
મનોહરાય । પ્રાજ્ઞાય । પ્રાજ્ઞપતયે । સૂર્યાય નમઃ । ૧૨૦

ૐ સવિત્રે નમઃ । વિષ્ણવે । અંશુમતે । સદાગતયે । ગન્ધવહાય ।
વિહિતાય । વિધયે । આશુગાય । પતઙ્ગાય । પતગાય । સ્થાણવે ।
વિહઙ્ગાય । વિહગાય । વરાય । હર્યશ્વાય । હરિતાશ્વાય । હરિદશ્વાય ।
જગત્પ્રિયાય । ત્ર્યમ્બકાય । સર્વદમનાય નમઃ । ૧૪૦

ૐ ભાવિતાત્મને નમઃ । ભિષગ્વરાય । આલોકકૃતે । લોકનાથાય ।
લોકાલોકનમસ્કૃતાય । કાલાય । કલ્પાન્તકાય । વહ્નયે । તપનાય ।
સંપ્રતાપનાય । વિરોચનાય । વિરૂપાક્ષાય । સહસ્રાક્ષાય ।
પુરન્દરાય । સહસ્રરશ્મયે । મિહિરાય । વિવિધામ્બરભૂષણાય ।
ખગાય । પ્રતર્દનાય । ધન્યાય નમઃ । ૧૬૦

ૐ હયગાય નમઃ । વાગ્વિશારદાય । શ્રીમતે । અશિશિરાય । વાગ્મિને ।
શ્રીપતયે । શ્રીનિકેતનાય । શ્રીકણ્ઠાય । શ્રીધરાય । શ્રીમતે ।
શ્રીનિવાસાય । વસુપ્રદાય । કામચારિણે । મહામાયાય । મહોગ્રાય ।
અવિદિતામયાય । તીર્થક્રિયાવતે । સુનયાય । વિભક્તાય ।
ભક્તવત્સલાય નમઃ । ૧૮૦

ૐ કીર્તયે નમઃ । કીર્તિકરાય । નિત્યાય । કુણ્ડલિને । કવચિને । રથિને ।
હિરણ્યરેતસે । સપ્તાશ્વાય । પ્રયતાત્મને । પરન્તપાય । બુદ્ધિમતે ।
અમરશ્રેષ્ઠાય । રોચિષ્ણવે । પાકશાસનાય । સમુદ્રાય । ધનદાય ।
ધાત્રે । માન્ધાત્રે । કશ્મલાપહાય । તમોઘ્નાય નમઃ । ૨૦૦

ૐ ધ્વાન્તઘ્ને નમઃ । વહ્નયે । હોત્રે । અન્તઃકરણાય । ગુહાય । પશુમતે ।
પ્રયતાનન્દાય । ભૂતેશાય । શ્રીમતાં વરાય । નિત્યાય । અદિતાય ।
નિત્યરથાય । સુરેશાય । સુરપૂજિતાય । અજિતાય । વિજિતાય । જેત્રે ।
જઙ્ગમસ્થાવરાત્મકાય । જીવાનન્દાય । નિત્યગામિને નમઃ । ૨૨૦

ૐ વિજેત્રે નમઃ । વિજયપ્રદાય । પર્જન્યાય । અગ્નયે । સ્થિતયે ।
સ્થેયાય । સ્થવિરાય । નિરઞ્જનાય । પ્રદ્યોતનાય । રથારૂઢાય ।
સર્વલોકપ્રકાશકાય । ધ્રુવાય । મેષિને । મહાવીર્યાય । હંસાય ।
સંસારતારકાય । સૃષ્ટિકર્ત્રે । ક્રિયાહેતવે । માર્તણ્ડાય । મરુતાં
પતયે નમઃ । ૨૪૦

ૐ મરુત્વતે નમઃ । દહનાય । ત્વષ્ટ્રે । ભગાય । ભર્ગાય । અર્યમ્ણે ।
કપયે । વરુણેશાય । જગન્નાથાય । કૃતકૃત્યાય । સુલોચનાય ।
વિવસ્વતે । ભાનુમતે । કાર્યાય । કારણાય । તેજસાં નિધયે ।
અસઙ્ગગામિને । તિગ્માંશવે । ધર્માંશવે । દીપ્તદીધિતયે નમઃ । ૨૬૦

ૐ સહસ્રદીધિતયે નમઃ । બ્રધ્નાય । સહસ્રાંશવે । દિવાકરાય ।
ગભસ્તિમતે । દીધિતિમતે । સ્રગ્વિણે । મણિકુલદ્યુતયે । ભાસ્કરાય ।
સુરકાર્યજ્ઞાય । સર્વજ્ઞાય । તીક્ષ્ણદીધિતયે । સુરજ્યેષ્ઠાય ।
સુરપતયે । બહુજ્ઞાય । વચસાં પતયે । તેજોનિધયે । બૃહત્તેજસે ।
બૃહત્કીર્તયે । બૃહસ્પતયે નમઃ । ૨૮૦

ૐ અહિમતે નમઃ । ઊર્જિતાય । ધીમતે । આમુક્તાય । કીર્તિવર્ધનાય ।
મહાવૈદ્યાય । ગણપતયે । ધનેશાય । ગણનાયકાય । તીવ્રપ્રતાપનાય ।
તાપિને । તાપનાય । વિશ્વતાપનાય । કાર્તસ્વરાય । હૃષીકેશાય ।
પદ્માનન્દાય । અતિનન્દિતાય । પદ્મનાભાય । અમૃતાહારાય ।
સ્થિતિમતે નમઃ । ૩૦૦

ૐ કેતુમતે નમઃ । નભસે । અનાદ્યન્તાય । અચ્યુતાય । વિશ્વાય ।
વિશ્વામિત્રાય । ઘૃણયે । વિરાજે । આમુક્તકવચાય । વાગ્મિને ।
કઞ્ચુકિને । વિશ્વભાવનાય । અનિમિત્તગતયે । શ્રેષ્ઠાય । શરણ્યાય ।
સર્વતોમુખાય । વિગાહિને । વેણુરસહાય । સમાયુક્તાય ।
સમાક્રતવે નમઃ । ૩૨૦

ૐ ધર્મકેતવે નમઃ । ધર્મરતયે । સંહર્ત્રે । સંયમાય । યમાય ।
પ્રણતાર્તિહરાય । વાયવે । સિદ્ધકાર્યાય । જનેશ્વરાય । નભસે ।
વિગાહનાય । સત્યાય । સવિત્રે । આત્મને । મનોહરાય । હારિણે । હરયે ।
હરાય । વાયવે । ઋતવે નમઃ । ૩૪૦

ૐ કાલાનલદ્યુતયે નમઃ । સુખસેવ્યાય । મહાતેજસે । જગતામેકકારણાય ।
મહેન્દ્રાય । વિષ્ટુતાય । સ્તોત્રાય । સ્તુતિહેતવે । પ્રભાકરાય ।

સહસ્રકરાય । આયુષ્મતે । અરોષાય । સુખદાય । સુખિને । વ્યાધિઘ્ને ।
સુખદાય । સૌખ્યાય । કલ્યાણાય । કલતાં વરાય । આરોગ્યકારણાય નમઃ । ૩૬૦

ૐ સિદ્ધયે નમઃ । ઋદ્ધયે । વૃદ્ધયે । બૃહસ્પતયે । હિરણ્યરેતસે ।
આરોગ્યાય । વિદુષે । બ્રધ્નાય । બુધાય । મહતે । પ્રાણવતે ।
ધૃતિમતે । ઘર્માય । ઘર્મકર્ત્રે । રુચિપ્રદાય । સર્વપ્રિયાય ।
સર્વસહાય । સર્વશત્રુવિનાશનાય । પ્રાંશવે । વિદ્યોતનાય નમઃ । ૩૮૦

ૐ દ્યોતાય નમઃ । સહસ્રકિરણાય । કૃતિને । કેયૂરિણે । ભૂષણોદ્ભાસિને ।
ભાસિતાય । ભાસનાય । અનલાય । શરણ્યાર્તિહરાય । હોત્રે । ખદ્યોતાય ।
ખગસત્તમાય । સર્વદ્યોતાય । ભવદ્યોતાય । સર્વદ્યુતિકરાય ।
મતાય । કલ્યાણાય । કલ્યાણકરાય । કલ્યાય । કલ્યકરાય નમઃ । ૪૦૦

ૐ કવયે નમઃ । કલ્યાણકૃતે । કલ્યવપવે । સર્વકલ્યાણભાજનાય ।
શાન્તિપ્રિયાય । પ્રસન્નાત્મને । પ્રશાન્તાય । પ્રશમપ્રિયાય ।
ઉદારકર્મણે । સુનયાય । સુવર્ચસે । વર્ચસોજ્જ્વલાય । વર્ચસ્વિને ।
વર્ચસામીશાય । ત્રૈલોક્યેશાય । વશાનુગાય । તેજસ્વિને । સુયશસે ।
વર્ષ્મિણે । વર્ણાધ્યક્ષાય નમઃ । ૪૨૦

ૐ બલિપ્રિયાય નમઃ । યશસ્વિને । તેજોનિલયાય । તેજસ્વિને ।
પ્રકૃતિસ્થિતાય । આકાશગાય । શીઘ્રગતયે । આશુગાય । ગતિમતે ।
ખગાય । ગોપતયે । ગ્રહદેવેશાય । ગોમતે । એકાય । પ્રભઞ્જનાય ।
જનિત્રે । પ્રજનાય । જીવાય । દીપાય । સર્વપ્રકાશકાય નમઃ । ૪૪૦

ૐ સર્વસાક્ષિને નમઃ । યોગનિત્યાય । નભસ્વતે । અસુરાન્તકાય ।
રક્ષોઘ્નાય । વિઘ્નશમનાય । કિરીટિને । સુમનઃપ્રિયાય । મરીચિમાલિને ।
સુમતયે । કૃતાભિખ્યવિશેષકાય । શિષ્ટાચારાય । શુભાકારાય ।
સ્વચારાચારતત્પરાય । મન્દારાય । માઠરાય । વેણવે । ક્ષુધાપાય ।
ક્ષ્માપતયે । ગુરવે નમઃ । ૪૬૦

ૐ સુવિશિષ્ટાય નમઃ । વિશિષ્ટાત્મને । વિધેયાય । જ્ઞાનશોભનાય ।
મહાશ્વેતાય । પ્રિયાય । જ્ઞેયાય । સામગાય । મોક્ષદાયકાય ।
સર્વવેદપ્રગીતાત્મને । સર્વવેદલયાય । મહતે । વેદમૂર્તયે ।
ચતુર્વેદાય । વેદભૃતે । વેદપારગાય । ક્રિયાવતે । અસિતાય । જિષ્ણવે ।
વરીયાંશવે નમઃ । ૪૮૦

ૐ વરપ્રદાય નમઃ । વ્રતચારિણે । વ્રતધરાય । લોકબન્ધવે ।

અલઙ્કૃતાય । અલઙ્કારાક્ષરાય । વેદ્યાય । વિદ્યાવતે । વિદિતાશયાય ।
આકારાય । ભૂષણાય । ભૂષ્યાય । ભૂષ્ણવે । ભુવનપૂજિતાય ।
ચક્રપાણયે । ધ્વજધરાય । સુરેશાય । લોકવત્સલાય । વાગ્મિપતયે ।
મહાબાહવે નમઃ । ૫૦૦

ૐ પ્રકૃતયે નમઃ । વિકૃતયે । ગુણાય । અન્ધકારાપહાય । શ્રેષ્ઠાય ।
યુગાવર્તાય । યુગાદિકૃતે । અપ્રમેયાય । સદાયોગિને । નિરહઙ્કારાય ।
ઈશ્વરાય । શુભપ્રદાય । શુભાય । શાસ્ત્રે । શુભકર્મણે ।
શુભપ્રદાય । સત્યવતે । શ્રુતિમતે । ઉચ્ચૈર્નકારાય ।
વૃદ્ધિદાય નમઃ । ૫૨૦

ૐ અનલાય નમઃ । બલભૃતે । બલદાય । બન્ધવે । મતિમતે ।
બલિનાં વરાય । અનઙ્ગાય । નાગરાજેન્દ્રાય । પદ્મયોનયે । ગણેશ્વરાય ।
સંવત્સરાય । ઋતવે । નેત્રે । કાલચક્રપ્રવર્તકાય । પદ્મેક્ષણાય ।
પદ્મયોનયે । પ્રભાવતે । અમરાય । પ્રભવે । સુમૂર્તયે નમઃ । ૫૪૦

ૐ સુમતયે નમઃ । સોમાય । ગોવિન્દાય । જગદાદિજાય । પીતવાસસે ।
કૃષ્ણવાસસે । દિગ્વાસસે । ઇન્દ્રિયાતિગાય । અતીન્દ્રિયાય । અનેકરૂપાય ।
સ્કન્દાય । પરપુરઞ્જયાય । શક્તિમતે । જલધૃગે । ભાસ્વતે ।
મોક્ષહેતવે । અયોનિજાય । સર્વદર્શિને । જિતાદર્શાય ।
દુઃસ્વપ્નાશુભનાશનાય નમઃ । ૫૬૦

ૐ માઙ્ગલ્યકર્ત્રે નમઃ । તરણયે । વેગવતે । કશ્મલાપહાય ।
સ્પષ્ટાક્ષરાય । મહામન્ત્રાય । વિશાખાય । યજનપ્રિયાય ।
વિશ્વકર્મણે । મહાશક્તયે । દ્યુતયે । ઈશાય । વિહઙ્ગમાય ।
વિચક્ષણાય । દક્ષાય । ઇન્દ્રાય । પ્રત્યૂષાય । પ્રિયદર્શનાય ।
અખિન્નાય । વેદનિલયાય નમઃ । ૫૮૦

ૐ વેદવિદે નમઃ । વિદિતાશયાય । પ્રભાકરાય । જિતરિપવે । સુજનાય ।
અરુણસારથયે । કુનાશિને । સુરતાય । સ્કન્દાય । મહિતાય । અભિમતાય ।
ગુરવે । ગ્રહરાજાય । ગ્રહપતયે । ગ્રહનક્ષત્રમણ્ડલાય । ભાસ્કરાય ।
સતતાનન્દાય । નન્દનાય । નરવાહનાય । મઙ્ગલાય નમઃ । ૬૦૦

ૐ મઙ્ગલવતે નમઃ । માઙ્ગલ્યાય । મઙ્ગલાવહાય ।
મઙ્ગલ્યચારુચરિતાય । શીર્ણાય । સર્વવ્રતાય । વ્રતિને । ચતુર્મુખાય ।
પદ્મમાલિને । પૂતાત્મને । પ્રણતાર્તિઘ્ને । અકિઞ્ચનાય । સતામીશાય ।

નિર્ગુણાય । ગુણવતે । શુચયે । સમ્પૂર્ણાય । પુણ્ડરીકાક્ષાય । વિધેયાય ।
યોગતત્પરાય નમઃ । ૬૨૦

ૐ સહસ્રાંશવે નમઃ । ક્રતુમતયે । સર્વજ્ઞાય । સુમતયે । સુવાચે ।
સુવાહનાય । માલ્યદામ્ને । કૃતાહારાય । હરિપ્રિયાય । બ્રહ્મણે ।
પ્રચેતસે । પ્રથિતાય । પ્રયતાત્મને । સ્થિરાત્મકાય । શતવિન્દવે ।
શતમુખાય । ગરીયસે । અનલપ્રભાય । ધીરાય । મહત્તરાય નમઃ । ૬૪૦

ૐ વિપ્રાય નમઃ । પુરાણપુરુષોત્તમાય । વિદ્યારાજાધિરાજાય । વિદ્યાવતે ।
ભૂતિદાય । સ્થિતાય । અનિર્દેશ્યવપવે । શ્રીમતે । વિપાપ્મને ।
બહુમઙ્ગલાય । સ્વઃસ્થિતાય । સુરથાય । સ્વર્ણાય । મોક્ષદાય ।
બલિકેતનાય । નિર્દ્વન્દ્વાય । દ્વન્દ્વઘ્ને । સર્ગાય । સર્વગાય ।
સંપ્રકાશકાય નમઃ । ૬૬૦

ૐ દયાલવે નમઃ । સૂક્ષ્મધિયે । ક્ષાન્તયે । ક્ષેમાક્ષેમસ્થિતિપ્રિયાય ।
ભૂધરાય । ભૂપતયે । વક્ત્રે । પવિત્રાત્મને । ત્રિલોચનાય ।
મહાવરાહાય । પ્રિયકૃતે । દાત્રે । ભોક્ત્રે । અભયપ્રદાય ।
ચક્રવર્તિને । ધૃતિકરાય । સમ્પૂર્ણાય । મહેશ્વરાય ।
ચતુર્વેદધરાય । અચિન્ત્યાય નમઃ । ૬૮૦

ૐ વિનિન્દ્યાય નમઃ । વિવિધાશનાય । વિચિત્રરથાય । એકાકિને ।
સપ્તસપ્તયે । પરાત્પરાય । સર્વોદધિસ્થિતિકરાય । સ્થિતિસ્થેયાય ।
સ્થિતિપ્રિયાય । નિષ્કલાય । પુષ્કલાય । વિભવે । વસુમતે ।
વાસવપ્રિયાય । પશુમતે । વાસવસ્વામિને । વસુધામ્ને । વસુપ્રદાય ।
બલવતે । જ્ઞાનવતે નમઃ । ૭૦૦

ૐ તત્ત્વાય નમઃ । ઓઙ્કારાય । ત્રિષુ સંસ્થિતાય । સઙ્કલ્પયોનયે ।
દિનકૃતે । ભગવતે । કારણાપહાય । નીલકણ્ઠાય । ધનાધ્યક્ષાય ।
ચતુર્વેદપ્રિયંવદાય । વષટ્કારાય । ઉદ્ગાત્રે । હોત્રે । સ્વાહાકારાય ।
હુતાહુતયે । જનાર્દનાય । જનાનન્દાય । નરાય । નારાયણાય ।
અમ્બુદાય નમઃ । ૭૨૦

ૐ સન્દેહનાશનાય નમઃ । વાયવે । ધન્વિને । સુરનમસ્કૃતાય ।
વિગ્રહિને । વિમલાય । વિન્દવે । વિશોકાય । વિમલદ્યુતયે । દ્યુતિમતે ।
દ્યોતનાય । વિદ્યુતે । વિદ્યાવતે । વિદિતાય । બલિને । ઘર્મદાય ।
હિમદાય । હાસાય । કૃષ્ણવર્ત્મને । સુતાજિતાય નમઃ । ૭૪૦

ૐ સાવિત્રીભાવિતાય નમઃ । રાજ્ઞે । વિશ્વામિત્રાય । ઘૃણયે । વિરાજે ।
સપ્તાર્ચિષે । સપ્તતુરગાય । સપ્તલોકનમસ્કૃતાય । સમ્પૂર્ણાય ।
જગન્નાથાય । સુમનસે । શોભનપ્રિયાય । સર્વાત્મને । સર્વકૃતે ।
સૃષ્ટયે । સપ્તિમતે । સપ્તમીપ્રિયાય । સુમેધસે । મેધિકાય ।
મેધ્યાય નમઃ । ૭૬૦

ૐ મેધાવિને નમઃ । મધુસૂદનાય । અઙ્ગિરઃપતયે । કાલજ્ઞાય ।
ધૂમકેતવે । સુકેતનાય । સુખિને । સુખપ્રદાય । સૌખ્યાય । કામિને
કાન્તયે । કાન્તિપ્રિયાય । મુનયે । સન્તાપનાય । સન્તપનાય । આતપાય ।
તપસાં પતયે । ઉમાપતયે । સહસ્રાંશવે । પ્રિયકારિણે ।
પ્રિયઙ્કરાય નમઃ । ૭૮૦

ૐ પ્રીતયે નમઃ । વિમન્યવે । અમ્ભોત્થાય । ખઞ્જનાય । જગતાં પતયે ।
જગત્પિત્રે । પ્રીતમનસે । સર્વાય । ખર્વાય । ગુહાય । અચલાય ।
સર્વગાય । જગદાનન્દાય । જગન્નેત્રે । સુરારિઘ્ને । શ્રેયસે ।
શ્રેયસ્કરાય । જ્યાયસે । મહતે । ઉત્તમાય નમઃ । ૮૦૦

ૐ ઉદ્ભવાય નમઃ । ઉત્તમાય । મેરુમેયાય । અથાય । ધરણાય ।
ધરણીધરાય । ધરાધ્યક્ષાય । ધર્મરાજાય । ધર્માધર્મપ્રવર્તકાય ।
રથાધ્યક્ષાય । રથગતયે । તરુણાય । તનિતાય । અનલાય । ઉત્તરાય ।
અનુત્તરસ્તાપિને । અવાક્પતયે । અપાં પતયે । પુણ્યસઙ્કીર્તનાય ।
પુણ્યાય નમઃ । ૮૨૦

ૐ હેતવે નમઃ । લોકત્રયાશ્રયાય । સ્વર્ભાનવે । વિગતાનન્દાય ।
વિશિષ્ટોત્કૃષ્ટકર્મકૃતે । વ્યાધિપ્રણાશનાય । ક્ષેમાય । શૂરાય ।
સર્વજિતાં વરાય । એકરથાય । રથાધીશાય । શનૈશ્ચરસ્ય
પિત્રે । વૈવસ્વતગુરવે । મૃત્યવે । ધર્મનિત્યાય । મહાવ્રતાય ।
પ્રલમ્બહારસઞ્ચારિણે । પ્રદ્યોતાય । દ્યોતિતાનલાય ।
સન્તાપહૃતે નમઃ । ૮૪૦

ૐ પરસ્મૈ નમઃ । મન્ત્રાય । મન્ત્રમૂર્તયે । મહાબલાય । શ્રેષ્ઠાત્મને ।
સુપ્રિયાય । શમ્ભવે । મરુતામીશ્વરેશ્વરાય । સંસારગતિવિચ્છેત્ત્રે ।
સંસારાર્ણવતારકાય । સપ્તજિહ્વાય । સહસ્રાર્ચિષે । રત્નગર્ભાય ।
અપરાજિતાય । ધર્મકેતવે । અમેયાત્મને । ધર્માધર્મવરપ્રદાય ।
લોકસાક્ષિણે । લોકગુરવે । લોકેશાય નમઃ । ૮૬૦

ૐ ચણ્ડવાહનાય નમઃ । ધર્મયૂપાય । યૂપવૃક્ષાય । ધનુષ્પાણયે ।
ધનુર્ધરાય । પિનાકધૃતે । મહોત્સાહાય । મહામાયાય । મહાશનાય ।
વીરાય । શક્તિમતાં શ્રેષ્ઠાય । સર્વશસ્ત્રભૃતાં વરાય ।
જ્ઞાનગમ્યાય । દુરારાધ્યાય । લોહિતાઙ્ગાય । વિવર્ધનાય । ખગાય ।
અન્ધાય । ધર્મદાય । નિત્યાય નમઃ । ૮૮૦

ૐ ધર્મકૃતે નમઃ । ચિત્રવિક્રમાય । ભગવતે । આત્મવતે । મન્ત્રાય ।
ત્ર્યક્ષરાય । નીલલોહિતાય । એકાય । અનેકાય । ત્રયિને । કાલાય ।
સવિત્રે । સમિતિઞ્જયાય । શાર્ઙ્ગધન્વને । અનલાય । ભીમાય ।
સર્વપ્રહરણાયુધાય । સુકર્મણે । પરમેષ્ઠિને । નાકપાલિને નમઃ । ૯૦૦

ૐ દિવિસ્થિતાય નમઃ । વદાન્યાય । વાસુકયે । વૈદ્યાય । આત્રેયાય ।
પરાક્રમાય । દ્વાપરાય । પરમોદારાય । પરમાય । બ્રહ્મચર્યવતે ।
ઉદીચ્યવેષાય । મુકુટિને । પદ્મહસ્તાય । હિમાંશુભૃતે । સિતાય ।
પ્રસન્નવદનાય । પદ્મોદરનિભાનનાય । સાયં દિવા દિવ્યવપુષે ।
અનિર્દેશ્યાય । મહાલયાય નમઃ । ૯૨૦

ૐ મહારથાય નમઃ । મહતે । ઈશાય । શેષાય । સત્ત્વરજસ્તમસે ।
ધૃતાતપત્રપ્રતિમાય । વિમર્ષિને । નિર્ણયાય । સ્થિતાય । અહિંસકાય ।
શુદ્ધમતયે । અદ્વિતીયાય । વિવર્ધનાય । સર્વદાય । ધનદાય ।
મોક્ષાય । વિહારિણે । બહુદાયકાય । ચારુરાત્રિહરાય । નાથાય નમઃ । ૯૪૦

ૐ ભગવતે નમઃ । સર્વગાય । અવ્યયાય । મનોહરવપવે । શુભ્રાય ।
શોભનાય । સુપ્રભાવનાય । સુપ્રભાવાય । સુપ્રતાપાય । સુનેત્રાય ।
દિગ્વિદિક્પતયે । રાજ્ઞીપ્રિયાય । શબ્દકરાય । ગ્રહેશાય । તિમિરાપહાય ।
સૈંહિકેયરિપવે । દેવાય । વરદાય । વરનાયકાય । ચતુર્ભુજાય નમઃ । ૯૬૦

ૐ મહાયોગિને નમઃ । યોગીશ્વરપતયે । અનાદિરૂપાય ।
અદિતિજાય । રત્નકાન્તયે । પ્રભામયાય । જગત્પ્રદીપાય ।
વિસ્તીર્ણાય । મહાવિસ્તીર્ણમણ્ડલાય । એકચક્રરથાય ।
સ્વર્ણરથાય । સ્વર્ણશરીરધૃષે । નિરાલમ્બાય । ગગનગાય ।
ધર્મકર્મપ્રભાવકૃતે । ધર્માત્મને । કર્મણાં સાક્ષિણે । પ્રત્યક્ષાય ।
પરમેશ્વરાય । મેરુસેવિને નમઃ । ૯૮૦

ૐ સુમેધાવિને નમઃ । મેરુરક્ષાકરાય । મહતે । આધારભૂતાય ।
રતિમતે । ધનધાન્યકૃતે । પાપસન્તાપહર્ત્રે । મનોવાઞ્છિતદાયકાય ।

રોગહર્ત્રે । રાજ્યદાયિને । રમણીયગુણાય । અનૃણિને ।
કાલત્રયાનન્તરૂપાય । મુનિવૃન્દનમસ્કૃતાય । સન્ધ્યારાગકરાય ।
સિદ્ધાય । સન્ધ્યાવન્દનવન્દિતાય । સામ્રાજ્યદાનનિરતાય ।
સમારાધનતોષવતે । ભક્તદુઃખક્ષયકરાય નમઃ । ૧૦૦૦

ૐ ભવસાગરતારકાય નમઃ । ભયાપહર્ત્રે । ભગવતે ।
અપ્રમેયપરાક્રમાય । મનુસ્વામિને । મનુપતયે । માન્યાય ।
મન્વન્તરાધિપાય । ૧૦૦૮

ફલશ્રુતિઃ
એતત્તે સર્વમાખ્યાતં યન્માં ત્વં પરિપૃચ્છસિ ।
નામ્નાં સહસ્રં સવિતુઃ પારાશર્યો યદાહ મે ॥ ૧॥

ધન્યં યશસ્યમાયુષ્યં દુઃખદુઃસ્વપ્નનાશનમ્ ।
બન્ધમોક્ષકરં ચૈવ ભાનોર્નામાનુકીર્તનાત્ ॥ ૨॥

યસ્ત્વિદં શ‍ૃણુયાન્નિત્યં પઠેદ્વા પ્રયતો નરઃ ।
અક્ષયં સુખમન્નાદ્યં ભવેત્તસ્યોપસાધિતમ્ ॥ ૩॥

નૃપાગ્નિતસ્કરભયં વ્યાધિતો ન ભયં ભવેત્ ।
વિજયી ચ ભવેન્નિત્યમાશ્રયં પરમાપ્નુયાત્ ॥ ૪॥

કીર્તિમાન્ સુભગો વિદ્વાન્ સ સુખી પ્રિયદર્શનઃ ।
જીવેદ્વર્ષશતાયુશ્ચ સર્વવ્યાધિવિવર્જિતઃ ॥ ૫॥

નામ્નાં સહસ્રમિદમંશુમતઃ પઠેદ્યઃ
પ્રાતઃ શુચિર્નિયમવાન્ સુસમૃદ્ધિયુક્તઃ ।
દૂરેણ તં પરિહરન્તિ સદૈવ રોગાઃ
ભૂતાઃ સુપર્ણમિવ સર્વમહોરગેન્દ્રાઃ ॥ ૬॥

ઇતિ શ્રીભવિષ્યપુરાણે સપ્તમકલ્પે ।
શ્રીભગવત્સૂર્યસ્ય સહસ્રનામાવલિઃ સમાપ્તા ।
શ્રીસૂર્યસહસ્રનામાવલી ।

Proofread by PSA Easwaran

*Shri Surya Sahasranamavali 1 108 Names*

pdf was typeset on June 7, 2020

Please send corrections to *sanskrit@cheerful.com*